# Question Paper Code : 7275

**M.A. (Semester-III) Examination, 2017**

**संस्कृतम्**

**( वर्ग-'क' वेद )**

**[ Second Paper ]**

**( ब्राह्मणं मीमांसा च )**

**समयावधि : घण्टात्रयम्** **पूर्णाङ्काः : 70**

**निर्देश :** केवलं पञ्च प्रश्नाः समाधेयाः। प्रतिवर्गं न्यूनतम एकः प्रश्नोऽवश्यं ग्राह्यः। **प्रथमः प्रश्नोऽनिवार्यः।**

1. अधोलिखित विषयेषु टिप्पण्यो विलेख्याः – [3x10=30]

(क) ऐतरेय ब्राह्मणम्

(ख) अग्निर्वै देवानामवमः

(ग) घृते चरूं निर्वयेत योऽप्रतिष्ठितां मन्येत

(घ) पाङ्क्तो वै यज्ञः

(ङ) आतिथ्येष्टिः

(च) पुरोडाशः



http://www.lucknowstudy.com

(छ) लौगाक्षिभास्कराऽभिमते धर्मस्वरूपम्

(ज) अपौरुषेयं वाक्यं वेदः ?

(झ) उत्पत्तिविधिः ?

(ञ) शाब्दीभावना ?

## प्रथमो वर्गः

2. अधोलिखितस्याडंश द्वयस्य व्याख्या प्रसङ्गसहिता विधेया ? [10]

(क) अष्टकपाल आग्नेयः अष्टाक्षरा वै गायत्री, गायत्रमग्नेश्छन्दः, त्रिकपालो वैष्णवः त्रिर्हीदं विष्णुर्व्यक्रमत, सैनयोस्तत्र क्लृप्तिः सा विभक्तिः।

(ख) आरब्धयज्ञो वा एष आरब्धदेवतो यो दर्शपूर्णमासाभ्यां यजत आमावास्येन वा हविषेष्ट्वा पौर्णमासेन वा तस्मिन्नेव हविषि तस्मिन् बर्हिषि दीक्षितैषा एक दीक्षा।

3. निम्नलिखितयोरंशयोर्व्याख्या प्रसङ्गपुरस्सरं विधेया - [10]

(क) देवविशः कल्पयितव्या इत्याहुस्ताः कुल्यमाना अनुमनुष्यविशः कल्पन्त इति सर्वाविशः कल्पयते यज्ञोऽपि।

(ख) मुष्टी वै कृत्वा गर्भोऽन्तः शेते, मुष्टी कृत्वा कुमारो जायते, तद्यन्मुष्टी कुरुते यज्ञं चैव तत् सर्वाश्च देवताः मुष्टयोः कुरुते।



## द्वितीयो वर्गः

4. ऐतरेयब्राह्मणमधिकृत्य दीक्षणीयेष्टिविधिः सविस्तरं निरुपणीयः ? [10]

5. अधोलिखित-विषयेषु टिप्पण्यः कार्याः - [10]

(क) आहुतयः ऊतयश्च

(ख) सोमक्रयः सोमक्रयणी च

## तृतीयो वर्गः

6. अधोलिखितस्य सन्दर्भसहिता व्याख्या विधेया - [10]

तत्राज्ञातार्थज्ञापको वेदभागो विधिः। स च तादृश प्रयोजनवदर्थ-विधानेनार्थवान् यादृशं चार्थं प्रमाणान्तरेणाप्राप्तं विधत्ते यथा अग्निहोत्रं जुहुयात् स्वर्गकाम इति विधिर्मानान्तरेणाप्राप्तं स्वगप्रयोजनबद्धोमं विधत्ते, अग्निहोत्रहोमेन स्वर्गं भावयेदिति वाक्यार्थबोधः।

7. निम्नलिखितस्यांशस्य विशद व्याख्या सन्दर्भपुरस्संर कार्या ? [10]

स्वाध्यायोऽध्येतव्य इत्यध्ययनविधौ तदध्ययनस्यार्थज्ञानरूपदृष्टार्थकत्वेन व्यवस्थापनात्। तथा च वेदाध्ययनान्तरं यतोऽर्थज्ञानरूपदृष्टार्थकं तदध्ययनमतो हेतोर्धर्मस्य वेदार्थस्य जिज्ञासा कर्तव्येति शेषः। जिज्ञासापदस्य विचारे लक्षणा। अतो धर्मविचारशास्त्रमिदमारम्भणीयमिति शास्त्रारम्भसूत्रार्थः।।



http://www.lucknowstudy.com

## चतुर्थो वर्गः

8. भावनायाः विशदस्वरूपं विलिख्य आर्थोभावनायाः साङ्गोपाङ्गं निरुपणं लौगाक्षिभास्कराभिमतमाश्रित्य कर्तव्यम् ? [10]

9. अधोलिखितयोर्निरूपणमर्थसङ्ग्रहमधिकृत्य विधेयम् ? [10]

(क) विनियोगविधिः

(ख) विनियोगविधेः श्रुतिप्रमाणम्

----- x -----



http://www.lucknowstudy.com